भूय एव महाबाहो शृणु मे परमं वचः।

यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १०.१ ॥

bhūya eva mahābāho śṛṇu me paramaṁ vacaḥ |
yatte'haṁ prīyamāṇāya vakśyāmi hitakāmyayā || 10.1||

न मे विदुः सुरगणाः प्रभवं न महर्षयः।

अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ १०.२ ॥

na me viduḥ suragaṇāḥ prabhavaṁ na maharṣayaḥ |
ahamādirhi devānāṁ maharṣīṇāṁ ca sarvaśaḥ || 10.2||

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।

असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ १०.३ ॥

yo māmajamanādiṁ ca vetti lokamaheśvaram |
asammūḍhaḥ sa martyeṣu sarvapāpaiḥ pramucyate || 10.3||

बुद्धिर्ज्ञानमसंमोहः क्शमा सत्यं दमः शमः।

सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥ १०.४ ॥

buddhirjñānamasammohaḥ kśamā satyaṁ damaḥ śamaḥ |
sukhaṁ duḥkhaṁ bhavo'bhāvo bhayaṁ cābhayameva ca || 10.4||

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।

भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ १०.५ ॥

ahiṁsā samatā tuṣṭistapo dānaṁ yaśo'yaśaḥ |
bhavanti bhāvā bhūtānāṁ matta eva pṛthagvidhāḥ || 10.5||

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।

मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ १०.६ ॥

maharṣayaḥ sapta pūrve catvāro manavastathā |
madbhāvā mānasā jātā yeṣāṁ loka imāḥ prajāḥ || 10.6||